श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षड्षष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षट्षष्टितमं दशकम् ॥

## गोपीजनाह्लादनवर्णनम्

उपयातानां सुदृशां
    कुसुमायुधबाणपातविवशानाम्।
अभिवाञ्छितं विधातुं
    कृतमतिरपि ता जगाथ वाममिव ॥ **66.1** ॥

गगनगतं मुनिनिवहं
    श्रावयितुं जगिथ कुलवधूधर्मम्।
धर्म्यं खलु ते वचनं
    कर्म तु नो निर्मलस्य विश्वास्यम् ॥ **66.2** ॥

आकर्ण्य ते प्रतीपां
    वाणीमेणीदृशः परं दीनाः।
मा मा करुणासिन्धो
    परित्यजेत्यतिचिरं विलेपुस्ताः ॥ **66.3** ॥

तासां रुदितैर्लपितैः
    करुणाकुलमानसो मुरारे त्वम्।
ताभिस्समं प्रवृत्तो
    यमुनापुलिनेषु काममभिरन्तुम् ॥ **66.4** ॥

चन्द्रकरस्यन्दलस -
    त्सुन्दरयमुनातटान्तवीथीषु।

गोपीजनोत्तरीयै -
    रापादितसंस्तरो न्यषीदस्त्वम्॥ **66.5** ॥

सुमधुरनर्मालपनैः
    करसङ्ग्रहणैश्च चुम्बनोल्लासैः।
गाढालिङ्गनसङ्गै -
    स्त्वमङ्गनालोकमाकुलीचकृषे॥ **66.6** ॥

वासोहरणदिने य -
    द्वासोहरणं प्रतिश्रुतं तासाम्।
तदपि विभो रसविवश -
    स्वान्तानां कान्त सुभ्रुवामदधाः॥ **66.7** ॥

कन्दलितघर्मलेशं
    कुन्दमृदुस्मेरवक्त्रपाथोजम्।
नन्दसुत त्वां त्रिजगत् -
    सुन्दरमुपगूह्य नन्दिता बालाः॥ **66.8** ॥

विरहेष्वङ्गारमयः
    शृङ्गारमयश्च सङ्गमे हि त्वम्।
नितरामङ्गारमय -
    स्तत्र पुनस्सङ्गमेऽपि चित्रमिदम्॥ **66.9** ॥

राधातुङ्गपयोधर -
    साधुपरीरम्भलोलुपात्मानम्।
आराधये भवन्तं
    पवनपुराधीश शमय सकलगदान्॥ **66.10** ॥

॥ इति श्रीमन्नारायणीये षट्षष्टितमं दशकं समाप्तम्॥